CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding by MoE-IKS

श्रीगणेशायनमः॥श्रीमत्त्रीपुरसुंदर्यैनमः॥मंदारमालाकुलितालकायैकपा
लमालांकितशेखराय॥स्मरायवरायेचदिगंबरायनमःशिवायेचनमःशि
वाय॥१॥एतत्सहितेनैकैकवक्ष्यमाणमंत्रेणशिवयोःपूजनंकार्यं॥देव
देवजगन्नाथप्रार्थयेहंजगत्पते॥तावत्वंप्रीतिभावेनलिंगेस्मिन्संनिधो
भव॥मंदारमालाकुलितालकायैकपालमालांकितशेखराय॥स्मरांबरा
येचदिगंबरायनमःशिवायेचनमःशिवाय॥१॥सहस्रशीर्षापुरुषःसहस्रा
क्षःसहस्रपात्सभुम्यंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं॥देवदेवनम
स्तुभ्यंसहस्रशिरसेनमः॥नमस्तेरुद्रशिवायनागाधिपतयेनमः॥१॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कार्त्स्वरमयंदिव्येनानामणिगणान्वितं॥अनेकशक्तिसंयुक्तमासनंप्रति
गृह्यतां॥शिवायैसर्वमांगल्यैशिवरूपेजगन्मये॥शिवेकल्याणदेनित्यं
शिवरूपेनमोस्तुते॥पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यंउतामृतत्वस्ये
शानोयदन्नेनातिरोहति॥इदमासनं॥गंगादिसर्वतीर्थेभ्योमयाप्रा
र्थनयाहृतं॥तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां॥शिवरूपेनमस्तुभ्यं
शिवायैसततंनमः॥नमस्तेविश्वरूपिण्यैजगद्धात्रिनमोस्तुते॥एतावान
स्यमहिमातोज्यायांश्चपूरुषःपादोस्यविश्वाभूतानित्रिपादस्यामृतं
दिवि॥इतिपाद्यं॥वरेण्यंजपुरुषंप्रजापालनतत्परं॥नमोमहत्म्यदेवाय

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding for MoE Grant-2

गृहाणार्घ्यंनमोस्तुते॥संसारभारसंतापात्मुच्यतेसिंहवाहिनी॥येनकामेनदे
विदुंपूजितासिमहेश्वरि॥त्रिपादूर्ध्वउदयीत्पुरुषःपादोस्येहाभवत्पुनः॥
ततोविष्वंव्यक्रामत्साशनानशनेअभि॥इतिअर्घ्यं॥पाडलोशीरकर्पूर
सुरभिस्वादुसीतलं॥तोयमाचमनीयार्थंनिर्मलंप्रतिगृह्यतां॥लोकानांतु
ष्टिकरीचमुक्तिराचसदानृणां॥याचितंदेहिमेनित्युदितंचनिवारय॥
तस्माद्विराळजायतविराजोअधीपुरूषः॥सजातोयत्यरिच्यतपश्चाद्भूमिथो
पुरः॥इतिआचमनं॥पयोदधिघृतंचैवमाक्षिकंशर्करान्वितं॥पंचामृतेनस्नपनं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

ह० ख० गाउ

२

करिष्येव्रतसिद्धये॥मंदाकिन्याःसमानीतंहेमांभोरुहवासितं॥स्नानायतेमय
मत्तयानीरंस्त्रीक्रीयतामिदं॥यत्पुरुषेणहविषादेवायज्ञमतंन्वत॥वसंतोअ
स्यासीदाज्यंग्रीष्मइध्मशरद्धविः॥इतिस्नानं॥सर्वभूषाधिकेसोम्येलोकल
ज्जानिवारके॥मयोपपादितेतुभ्यंवाससीप्रतिगृह्यतां॥वस्त्रयुग्मंशुचिर्यस्म
देवदेवस्यवल्लभे॥गृहाणेदंमयादत्तंसर्वसौभाग्यदायिनि॥तंयज्ञंबर्हिषिप्रौ
क्षंपूरुषंजातमग्रतः॥तेनदेवाअयजंतसाध्याऋषयश्चये॥इतिवस्त्रं॥महा
देवनमस्तेस्तुत्राहिमांभवसागरात्॥ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम॥
चंदनेनसुगंधेनकर्पूरागरुमिश्रितं॥लेपयेहंतवांगानिप्रीतयेचहरिप्रिये॥

जगदंब

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्या
श्च ये॥ इति पञ्चोपचितं॥ मलयाचलसंभूतं घनसारमनोहरं॥ हरयानंदनंसा
रुचंदनंप्रतिगृह्यतां॥ शिवपलिनगोत्पन्नेहरिद्रेदक्षनाबुजे॥ हरेपा
दाब्जसंसेव्येभद्रकालिनमोस्तुते॥ हरिद्रां॥ कुंकुमंसर्वसौभाग्यंकामनाकामसं
भवं॥ सुगंधंपरमंदिव्यंगृहाणपरमेश्वरि॥ कुंकुमं॥ बालारुणानिभंरेविसिं
दूरंसुमनोहरं॥ दासमिभक्तियुक्तेनप्रसन्नवरदाभव॥ सिंदूरं॥ तस्माद्य
ज्ञात्सर्वहुत ऋचःसामानिजज्ञिरे॥ छंदांसिजज्ञिरेतस्माद्यजुःतस्मादजायता॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इतिगंधं।रंजिताःकुंकुमेनोक्तअक्षतास्तुसुशोभनाः।।त्राहिमांसर्वपापेभ्योगृहा
णवृषभध्वज।।नानारत्नैःपरिवृताशुद्धजांबुदनिर्मिता।।गृहाणचंडिकेदेविभ
लंकारान्मनोहरान्।।रंजिताःकुंकुमाद्यैश्चअक्षतास्तुसुशोभनाः।।ममाद्यदेविसा
नेनप्रसन्नभवपार्वती।।तस्मादद्याऽजायंतयेकेचोभयादृतः।।गोवोहजइतिं
तस्मात्तस्माज्जाताअजावयः।।इतिअक्षतां।।माल्यादीनिसुगंधीनिमालत्यादी
निवैप्रभो।।मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां।।इतिपुष्पं।।अथांगपूजा
शिवस्य।।शंभवेनमः।पादौपूजयामि।शिवायनमः।गुल्फौपू०रुद्रायनमः।जानु
नीपू०भीमायनमः।जंघेपू०अभीष्टदायिनेनमः।ऊरूपू०सर्वज्ञायनमः।कटिंपू०

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अनंचचतुर्विंशादुरसेःषड्भिःसमन्वितं।मस्यमोन्यसमायुक्तंनैवेद्यंप्रतिगृह्य
तां॥चंद्रमामनसोजातःचक्षोस्सूर्योअजायता।मुखादिंद्रश्चाग्निश्चप्राणाद्व
युरजायत।इतिनैवेद्यं॥कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतं॥आचम्य
तामुमानाथमयादत्तंहिभक्तितः॥नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौसमव
र्तत।पद्भ्यांभूमिर्दिशश्रोत्रात्तथालोकांन्अकल्पयन्॥इतिआचमनीयं॥
इदंफलंमयादेवंस्थापितंपुरतस्तव।तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥
फलंस०पूगीफलंसकर्पूरंनागवल्लिदलैर्युतंकर्पूरादिसमायुक्तंताम्बूलंवेद प
प्रतिगृह्यतां॥सप्तास्यासन्परिधयस्त्रिसप्तसमिधःकृताःदेवायज्ञं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding by MoE-IKS

हिरण्यगर्भगर्भस्त्वंहेमबीजविभावसो॥अनंतपुण्यफलदमतःशांतिंप्रय
इतिदक्षिणां॥लोकात्मासर्वभूतात्मानिमेषत्रुटिसंभव॥जन्ममृत्युजरारुग्ण
संसारभयनाशन॥यज्ञेनयज्ञमयजंतदेवाःस्तानिधर्माणिप्रथमान्यविभ
तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्यासंतिदेवाः॥इतिपुष्पांजलिं
नमस्तेदेवदेवेशनमस्तेधरणीधर॥नमस्तेविश्वरूपायनमस्तेपुरुषोत्तम॥इति
नमस्कारः॥मंत्रहीनंक्रियाहीनंभक्तिहीनंमहेश्वर॥यत्पूजितंतुमयादेवपरिपू
र्णंतदस्तुमे॥इत्यनेकपूजामंत्रानाहुः॥वस्तुतस्तुकथायांदर्शितविनियोगश्लो
कचतुष्टयात्मकेन॥नमःशिवायशांतायेतनेनमंत्रेणैवपूजाकार्या॥ ॥ ॥ राम०

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वाणकरानंच।देवस्यत्वासवितुरितिग्रहः॥इतिपूजाविधिः॥अथकथा॥कैला
सशिखरेरम्येगौरीपृच्छतिशंकरं॥गुह्याद्गुह्यतरंगुह्यंकथयस्वंमहेश्वर॥१
सर्वेषांधर्मसर्वस्वमल्पायासेमहत्फलं॥प्रसन्नोसिजगन्नाथसत्यंब्रूहिममाग्र
तः॥२॥केनचासिमयाप्राप्तोदानेनतपसापिवा॥अनादिमध्यनिधनोभर्त्ता
त्वंचजगत्प्रभुः॥३॥महादेवउवाच॥शृणुप्रियेप्रवक्ष्यामितवाग्रेव्रतमुत्तमं॥
गुह्यंममेतत्सर्वस्वंकथयामितवप्रिये॥४॥यथाचोडुगणेचंद्रोग्रहाणांभानु
रेवच॥यथाविप्रोमनुष्याणांदेवानांविष्णुरेवच॥५॥नदीनांचयथागंगापु
राणानांचभारतं॥वेदानांचयथासामइंद्रियाणांमनोरथा॥६॥पुराणवेद य

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सर्वस्वमागमेनयथोदितं॥श्रद्धयाचशृणुष्वेदंयथादृष्टंपुरातनं॥७॥ये
नव्रतप्रभावेनप्राप्तमर्धासनंमम॥तत्सर्वंकथयिष्यामियथादृष्टंहिमालये॥८॥
भाद्रेमासिसितेपक्षेतृतीयाहस्तसंयुता॥तदनुष्ठानमात्रेणसर्वपापैःप्रमुच्यते॥
९॥श्रुणुरेविवयापूर्वमज्ञानंत्याकृतंव्रतं॥वक्ष्येयतोषितस्तातंयथादृष्टं
हिमालये॥१०॥पार्वत्युवाच॥यथाकृतंमयापूर्वंव्रतंमेफलितंचतत्॥तत्सर्वं
श्रोतुमिच्छामित्वत्सकाशान्महेश्वर॥११॥ईश्वरउवाच॥अस्तितेपार्वतिपिताहि
मवान्नगुत्तमः॥नानापक्षिरवैरम्योनानाशृंगविचित्रतः॥१२॥यत्रदेवाःस
गंधर्वाःसिद्धचारणगुह्यकाः॥विचरंतियथाहृष्टागंधर्वागीततत्पराः॥१३॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

स्फटिकैः कांचनैः शृंगैर्मणिवैदूर्यभूषितैः॥ शिष्यभुजैरिवाकाशंयथाप्रीतः
प्रियंसखा॥१४॥ हिमेनपूरितःसर्वोगंगापानविचित्रितः॥ अप्सरोनृसंगी
तैश्चशोभितोयोनगेश्वरः॥१५॥तत्रत्वंपार्वतीपूर्वंचरतीसुमहत्तपः॥ अद्य
द्वादशकंरेविधूमपानमधोमुखं॥१६॥संवत्सरंचतुःषष्ठीपक्वपर्णाश
नंतलः॥ दृष्ट्वातेनतलक्ष्यं चिंतयादुःखितोभवत्॥१७॥ कस्मैदेया
याकन्याइतिचिंतापरोभवत्॥ एवंविचिंतयमानेतुनारदोमुनिरायो॥१८
अर्घ्यादिभिस्तमभ्यर्च्यहिमवानभ्यभाषत॥ हिमवानुवाच॥ किमर्थम
गतंदेवकथ्यतांमुनिसत्तम॥१९॥महाभाग्येनमेजातंत्वदीयागमनंमुने॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नारदउवाच॥शृणुष्वार्द्रयदर्थंहि विष्णुनाप्रेषितावयं॥२०॥योग्यंयोग्यायदातव्यंकन्यारत्नमिदंवया॥वासुदेवसमोनास्तिवरेशानाद्यसंभवः॥२१॥ वद्यतेनास्मैस्वस्यकन्येयंदीयतांममसंमतौ॥हिमवानुवाच॥वासुदेवःसमोदेवःकन्यांप्रार्थयतेयदि॥२२॥तदामयाप्रदातव्यात्वदागमनगोरवात्॥तच्छ्रुत्वाप्रययौसद्यःनारदःकेशवंप्रति॥२३॥उपगम्यमुनिर्देवंशंखचक्रगदाधरं॥हसन्नुवाचपुरोभूत्वामुनींद्रःप्रभाषतं॥२४॥नारदउवाच॥देवसिद्धंत्वयाकार्यंवैवाहिकपरोभव॥हिमवानब्रवीद्यस्तुतत्सर्वंश्रूयतांवचः॥इयंकन्यामयादत्तादेवायगरुडध्वजे॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

तच्छ्रुत्वातुमुनेर्वाक्यं पार्वतीदुःखिताभवत्॥ करेणपिकरौस्तब्धा अथवाकोनि
वारयत्॥ बलावच्छ्रुतःसिद्धेश्वराणामनीषितं॥ ५॥ दुःखमापतितं
तस्यासखीपप्रच्छतांशिवाम्॥ सख्युवाच॥ कथंदुःखितयैविकथयस्व
ममाग्रतः॥ २८॥ भद्रायतेनभद्रंतेकरिष्यामिनसंशयः॥ पार्व्युवाच॥ श्रृणु
मेवंमहाप्राज्ञेमनसाचिंतितंमया॥ २९॥ कपर्दिनंतुभर्तारंकरिष्येनसं
शयः॥ पार्व्यावचनंश्रुत्वासखीवचनमब्रवीत्॥ ३०॥ सख्युवाच॥ पितायत्र
नजानातिव्रजत्वंतद्वनंमहत्॥ ईश्वरुवाच॥ इत्येवंसंमतंकृत्वानीताशीघ्र
महद्वनं॥ ३१॥ पितावलोकयामासहिमवांस्तुगृहेगृहे॥ किंवानीतातुमेपुत्री
देवदानवकिंनरैः॥ ३२॥ सत्यंहतंमयापूर्वंकिंदास्येगरुडध्वजे॥ इत्येवंचिं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तयाविष्टोमूर्च्छितःपतितोभुवि॥७॥हाहाकृतास्तेलोकाःप्रधावंतिगिरिंप्रति॥
मूर्धाप्राप्तालयाकस्मात्कथयस्वेतितेब्रुवन्॥हिमवानुवाच॥कस्येदंचेष्टितंकू
रंकन्यारत्नंहृतंमम॥दृष्टावाकालसर्पेणसिंहव्याघ्रेणवामृता॥७॥ज्ञा
नजानेकगतापुत्रीकेनदुष्टेनवाहृता॥चकंपेशोकसंतप्तोवातेनेवयथा
तरुः॥७॥वंगतासिवनंघोरंनिर्जनंभयवर्द्धनं॥व्याघ्रसिंहगजक्रोडमृ
गपक्षिगणाकुलं॥७॥गिरिश्चारपुत्रीलामन्वीक्षंनिर्जनेवने॥तस्मिन्वा
रेवनेवंतुसखीभिःसहसंस्थिता॥७॥दृष्ट्वातत्रनदीरम्यातस्यास्तीरेसुमध्य
मा॥७॥उपविष्टालिभिःसार्धमन्नाहारविवर्जिता॥वालुकायाःकृतांमूर्तिशि
वायाःशंकरस्यच॥७॥भाद्रशुक्लतृतीयायामर्चयंतीसुमध्यमा॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तत्रवाद्यैर्गीतैर्नरात्रौजागरणंकृतम्॥४०॥तेनव्रतप्रभावेनमासनंचलितंमम॥
संप्राप्तोदेवितत्राहंयत्रत्वंसखिभिःसह॥४१॥प्रसन्नोस्मिमयाप्रोक्तंवरंवृ
णिवरानने॥पार्वत्युवाच॥यदिदेवप्रसन्नोसिभर्तामवतुमेश्वरः॥४२॥इत्यु
वाचप्रसन्नात्मासाज्ञानंतीस्वयंगतं॥तथेत्युक्त्वामयादेविकैलासंपुनरागतं॥
४३॥ततःप्रभातेविमलेनद्यांसंविसृज्यतत्॥पारणांतेकृतेतत्रमसङ्गतव
नगोचरे॥४४॥तत्रत्वंचप्रसुप्तासिसख्यासार्धंवरानने॥हिमवानपितंदे
शमाजगाममहावनं॥४५॥त्वामपश्यंश्चतुर्दिक्षुपानभोजनवर्जितः॥दृ
ष्ट्वातत्रनदीतीरेप्रसुप्तंकन्यकाद्वयं॥४६॥कृत्वाप्योत्संगमानीयरोदनंच

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सिंहव्याघ्रमृगैर्दुष्टं किमर्थंवनमागता॥॥॥पार्वत्युवाच॥मयाविचारितोम
र्तामहादेवःसदाशिवः॥तदन्यथाह्यतंततेनाहंवनमागता॥३॥तथेत्युक्त्वा
हिमवत्सदनंगताहंप्रति॥ततःप्रयुक्तेपित्राममवैवाहिकींक्रियां॥४॥
तेनव्रतप्रभावेनसौभाग्यंप्राप्तवत्यसि॥तदाद्यिव्रतराजस्तुनकस्यापिनिवे
दितः॥५॥व्रतराजस्यनामेदंशृणुदेवियथाभवत्॥हरितालीतिनामेदंम
न्वर्थमभवद्व्रतम्॥६॥अलीभिर्हरितायस्मात्तस्मात्साहरितालिका॥किं
पुण्यंकिंफलंचास्यकेनवाविधिनाचरेत्॥७॥ईश्वरउवाच॥शृणुदेविवि
धिंवक्ष्येनारीणांव्रतमुत्तमं॥कर्तव्यातुप्रयत्नेनयदिसौभाग्यमिच्छसि॥८॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तारणादिप्रकर्तव्यंकदलीस्तंभमंडितं॥आचार्यपञ्चस्त्रैस्तुर्नानावर्णैर्वि
चित्रितम्॥५५॥चंदनादिसुगंधेनलेपयेद्कुंकुमादिभिः॥शंखभेरीमृदंगैश्चवा
दित्रैर्बहुभिर्वरैः॥५६॥नानामंगलयोगस्तुकर्तव्योममसन्निधौ॥स्थापनंतत्र
कर्तव्यंपार्वत्याःसहितस्यमे॥५७॥पूजयेद्बहुभिःपुष्पैर्गंधधूपैर्मनोहरैः॥उपो
ष्यपूजयेद्भक्त्याकुर्याज्जागरणंनिशि॥५८॥नारिकेलैश्चडाबैरन्यैश्चवि
विधैःफलैः॥ऋतुदेशोद्भवैःसर्वैर्नैवेद्यैकुसुमैर्नवैः॥५९॥धूपदीपैःसुगंधै
श्चमंत्रेणानेनपूजयेत्॥नमःशिवायशांतायपंचवक्त्रायचूडिने॥६०॥नंदि
भृंगिमहाकालगुणयुक्तायशूलिने॥शिवायैशिवरूपायैमंगलायैमहेश्वरि॥६१॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शिवेसर्वार्थदेदेविशिवरूपेनमोस्तुते॥नमस्तेसर्वरूपिण्येसगुणाय्येनमोनमः॥
ध्यासंसारभीतिसंत्रस्तापाहिमांशंकरवाहिनि॥मयापियेनकामेनपूजितं
सिमहेश्वरि॥ध्यारुद्रहृदयसौभाग्यप्रसन्नाभवपार्वति॥मंत्रेणानेन
मंदेविपूजयेदुमयासह॥ध्यातःकथांसमाकर्ण्यश्रुत्वाद्यात्सदक्षिणां॥
ब्राह्मणायेप्रदातव्यंवस्त्रधेनुहिरण्यकं॥ध्यअन्येपांडीयतेदानंस्त्रीणां
भद्रादिकंतथा॥कथांश्रुत्वैकचित्तेनदंपतीभ्यांसदेवतु॥ध्यसंकल्पंच
ततःकुर्यागंधपुष्पादिपूजनैः॥याकरोतिमहादेवव्रतराजंविधानतः॥ध्य॥
सौभाग्यमायुष्यंपापक्षयमवाप्नुयात्॥तृतीयायांतुयानारीकिलभोज
नमाचरेत्॥ध्य॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

जन्मजन्मभवेद्ध्यावि धवाचपुनःपुनः॥दारिद्र्यंपुत्रशोकंचकर्कश्यं
दुःखभागिता॥७६॥यातिसानरकंघोरंयुपवासंनयाचरेत्॥कांचनं
रुक्मपात्रंचताम्रकंवातथैवच॥७०॥वेणुन्मृन्मयपात्राणिपूर्णानि
विविधैःफलैः॥एवंवोडशसंख्यानिब्राह्मणेभ्यःप्रदापयेत्॥७१॥यद्वा
ब्राह्मणयोषिद्भ्यःपारणंतदनंतरं॥अश्वमेधसहस्राणिवाजपेयशता
निच॥७२॥लभतेपुण्यमाप्नोतितत्कथाश्रवणादपि॥एतत्तेकथितं
हरिव्रतानामुत्तमंव्रतं॥७३॥तेनभावंप्रसन्नासिममदेहार्धतांतथा॥७४
एवंविधंयाकुरुतेचनारीवयासमानारमतेचभर्त्ता॥विनाशकालेमम

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तुल्यरूपंसायुज्यमुक्तिंलभतेचयुग्मं॥७॥गोभूरत्नसुवर्णादिवस्त्रदानंपुनः
पुनः॥तस्मायोग्यंकर्तव्यंसर्वकामार्थसिद्धये॥ ॥इतिभविष्योत्तरपु
राणेहरितालिकाव्रतकथासमाप्ता॥ ॥अथोद्यापनम्॥युधिष्ठिर
उवाच॥उद्यापनविधिंब्रूहितृतीयायाःसुरेश्वर॥भक्तितःश्रोतुमिच्छा
मिव्रतसंपूर्णहेतवे॥१॥श्रीकृष्णउवाच॥उद्यापनविधिंवक्ष्येसावधानेन
वैशृणु॥त्रिशद्धस्तप्रमाणेनप्रमितंदक्षिणोत्तरे॥२॥प्रयत्नाग्निरा
जेन्द्रसङ्गोचर्मसमिष्यते॥गोचर्ममात्रंलेप्येतगोमयेनविचक्षणः॥३॥
मंडलंकारयेत्तत्रनानावर्णसुशोभनं॥गृहमंडलमध्येतुपद्मंकृत्वाल

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तन्मयेस्थापयेत्कुंभमन्यंभुंतांम्रपात्रंप्रकुर्वितयत्नतो
ऽथाभिस्तथातदर्द्धेनवाकुर्यात्तत्राध्यावाहयेत्तत्र
र्षमात्रसुवर्णेनप्रतिमांकारयेद्बुधः॥तद्धेमध्यमंप्रोक्तं
दर्धंतुकनिष्ठकं॥दशारपंन्यसेत्तेनपार्श्वयोश्चक्रद्वयं॥
अथतांम्रमयेपात्रेप्रतिमांतत्रविन्यसेत्॥श्वेतवस्त्रयुग
छन्नांश्वेतयज्ञोपवीतकां॥भाजनंचतिलैःपूर्णंकृत्वाऽभ्यर्च्य वि
न्यसेत्॥पार्श्वयोस्तुयुगंदद्यात्स्थापइत्वाविधानतः॥वेदोक्तेन
प्रतिष्ठाप्यकर्त्तव्याचार्यसत्तमैः॥पंचामृतेनस्नपनंकृत्वादेव

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्यचोत्तमं॥स्नानंचकारयेत्पश्चात्ततःपूजांसमाचरेत्॥ धूपंचविमवै
श्चयाचंदनागरुसंयुतं॥नानाप्रकारैर्नैवेद्यैःसथादीपंचकारयेत्॥अ
र्चितांपूजयेद्भक्त्यागंधपुष्पैःफलाक्षतैः॥आवाहनादिकर्तव्यं पुराण
मसंभवैः॥कार्यो विधानतःपूजाश्रद्धाभक्तिपरैर्नरैः॥देवदेवसम
गच्छप्रार्थयेहंजगत्पते॥इमांममकृतांपूजांगृहाणसुरसत्तम॥ सह
स्रशीर्षेयावाहनं॥हरायचनमस्तुभ्यंसहस्रशिरसेनमः॥नमःसेहि
कावासायनागाधिपतयेनमः॥पुरुषायवेदासनं॥२॥संसारार्णवमग्न
चत्राहिमांवृषभध्वज॥हरायचनमस्तुभ्यंत्रैलोक्यव्यापिनेनमः॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एतावानस्येतिपाद्यं॥हावरेण्यपद्मपुरुषप्रजापालनतत्पर॥नमोमहत्प
देवायगृहाणार्घ्यंनमोस्तुते॥त्रिपादूर्ध्वायार्घ्यं॥पाटलोशीरकर्पूरसुरभिस्व
दुशीतलंतोयमाचमनीयार्थंनिर्मलंप्रतिगृह्यतां॥तस्माद्विराळित्याचमनीयं॥
मंदाकिन्याःसमानीतंहेमांभोरुहवासितं॥स्नानायतेमयाभक्त्यानीरंस्वीकु
यतामिदं॥गंगोदकंसमानीतंहेमकुंभेचनिर्मलं॥स्नानंगृह्यतांदेवप्रीता
यहरयेनमः॥यत्पुरुषेणेतिस्नानं॥धायुचिवस्त्रयुगंयस्माद्देवदेवस्यवल्ल
भम्॥पार्वत्याःसहदेवेशःप्रीयतांवस्त्रदानतः॥तंयज्ञंवस्त्रेणमहादेवन
मस्तेस्तुग्रहिमांभवसागरात्॥ब्रह्मसूत्रंसोत्तरीयंगृहाणसुरसत्तम॥त

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हर॰
१७

स्माद्यशात्सर्वकृतऋचइतिचंदनं॥पुष्पाणिचसुगंधीनिमलयादीनिवेप्रभो॥
मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां॥तस्माद्श्वाइतिपुष्पं॥वनस्प
युद्भवोदिव्योगंधाढ्यःसुमनोहरः॥आघ्रेयःसर्वदेवानांधूपोयंप्रति
गृह्यतां॥यत्पुरुषंव्यदधुरितिधूपं॥यज्योतिःसर्वभूतानांतेजसांतेजमु
त्तमं॥आत्मज्योतिःपरंधामदीपोयंप्रतिगृह्यतां॥ब्राह्मणोस्यमुखमि
त्यन्नंचशुचियत्स्वादुभूतानांजीवनंपरं॥नैवेद्यंतेमयादत्तंदेवे
शप्रतिगृह्यतां॥चंद्रमामनसइतिनैवेद्यं॥इदंफलमिफलं॥हिरण्य
गर्भगर्भस्थमितिदक्षिणा॥सप्तास्यासन्नितिप्रदक्षिणा॥लोकात्मन्सर्वभू

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तात्मन्निमेषत्रुटिसंभवा।।जन्ममृत्युजराव्याधिसंसारभयनाशना।।नमस्कारः।
मंत्रहीनंक्रियाहीनंभक्तिहीनंचयद्भवेत्।।भगवन्तत्प्रसादेनपरिपूर्णंतदस्तुमे।।प्रार्थना।।गीतनृत्यादिकंयुक्तंकथापुस्तकवाचनैः।।ऽपोषजागरंतत्रकर्तव्यंभक्तिभावतः।।ततःप्रभातेविमलेस्नात्वादिकर्मचपूर्ववदार्चयेद्देवंपश्चाद्धोमंचकारयेत्।।स्वगृह्योक्तेनविधिनाहूत्वाग्निंस्थापनंततः।।प्रारभेचततोहोमंनवग्रहपुरःसरं।।तिलांश्चयवसंमिश्रान्नाज्येनचपरिप्लुतान्।।जुहुयादुइमंशैलमौलिमंत्रेणवेदवित्।।अष्टोत्तरशतंवापिअष्टाविंशतिसंख्यया।।एवंसमाप्यहोमंतुतत्रा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

चार्यं पूजयेत्॥ अर्घ्यं पुष्पप्रदानैश्च वस्त्रालंकारभूषणैः॥ शय्यां सुलक्षणां
कुर्यात्प्रकीर्णतूलिकां॥ धेनुं सलक्षणां दद्यात्सुशीलां पयस्विनीं॥
स्वर्णशृंगीं रौप्यखुरां कांस्यदोहनसंयुतां॥ सवत्सां व्रणयुतां धेनुं
दद्यात्प्रयत्नतः॥ सुवर्णेनसमोपेतां सदा चातयसाधवे॥ प्रयत्नेन च क
र्तव्यं पक्वान्नषोडशोन्मितं॥ षोडशप्रमितैर्युक्तं ब्राह्मणाय निवेदयेत्॥
वंशपात्रप्रयत्नेन पक्वान्नैर्वयनैः शुभैः॥ अन्येभ्यो विप्रवर्येभ्यो दक्षि
णां च प्रयत्नतः॥ अन्नं च परया भक्त्या प्रदद्यादनुसारतः॥ बंधुभिः सह
भुंजीत नियतश्च परेऽहनि॥ एवं कृते भवेत्सार्धं परिपूर्णव्रतीयतः॥ इ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इतिभविष्योत्तरपुराणेहरितालिकातृतीयोद्यापनंसमाप्तं॥अथव्रतद्वये
पितृतीयामुहूर्तमात्रसत्वेपिपरैवग्राह्या॥चतुर्थीसंयुतायातुसातृती
यामशुभप्रदा॥अवैधव्यकरीस्त्रीणांपुत्रपौत्रफलप्रदा॥द्वितीयाशेष
संयुक्तांयाकरोतिविमोहिता॥सावैधव्यमवाप्नोतिप्रवदंतिमनीषि
णइतिमाधवीयेभापस्तंबवाक्येपरयुतायाःप्रशस्त्याभिधानात्पू
र्वयुतायानिंद्यायाश्रवणाच्च॥१ ॥२ ॥३ ॥४

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

CC-0 In Public Domain. Digitization by eGangotri/Sarayu Trust

कृ २५

कुसीलवीका

लघुतालिका

Kashi Maharani Collection, Ramnagar Fort, Varanasi

Kashi Maharani Collection, Ramnagar Fort, Varanasi